शशाङ्कस्य मासाः पृथक् सूर्य्यमासैर्विहीनास्तु कल्पेऽथवा तेऽधिमासाः इति"॥ इष्टवर्षेऽधिमासानयनं तत्रैवोक्तं यथा "कथितकल्पगतार्कसमागणो रविगुणो गतमाससमन्वितः। खदहनै (३०) र्गुणितस्तिथिसंयुतः पृथगतोऽधिकमाससमाहतात् (१५९३३०००००) ॥ रविदिना (१५५५२००००००००)प्तगताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः" इति। अत्र वासना कल्पगताब्दा द्वादशगुणिता रविमासा जातास्ते चैत्रादिगतचान्द्रतुल्यैः सौरैरेव युतास्त्रिंशद्गुणा इष्टमासप्रतिपदादिगततिथितुल्यैः सौरैरेव दिनैर्युताः एवन्ते सौरा जातास्तेभ्यः पृथक् स्थितेभ्योऽधिमासानयनं त्रैराशिकेन, यदि कल्पसौरदिनैः कल्पाधिमासा लभ्यन्ते तदैभिः किमिति फलम् गताधिमासाः। ते दिनीकृतैः पृथक् स्थितः सौराहर्गणसहितश्चान्द्रो भवति यतः सौरचान्द्रान्तरमधिमासदिनान्येव" इति। सूर्य्यसिद्धान्तेऽप्युक्तम्। "भवन्ति शशिनो मासाः सूर्य्येन्दुभगणान्तरम्। रविमासोनितास्ते तु शेषाः स्युरधिमासकाः" इति॥ सूर्य्यचन्द्रभगणयोरन्तरं चन्द्रस्य मासा भवन्ति ते चान्द्रमासा रविमासोनिताः सन्तः शेषा अवशिष्टा ये चान्द्रमासास्तेऽधिकमासा एव भवन्ति नान्ये। अनेन चान्द्रत्वमधिमासानां स्पष्टीकृतम्। अत्रोपपत्तिः। त्रिंशत्तिथ्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रस्य, द्वादशराशिमितेन सूर्य्येन्द्वन्तरेणैव सिद्धिः कथमन्यथा दर्शान्ते जातस्य मन्दशीघ्रयोः सूर्य्येन्द्वोर्योगस्य पुनर्दर्शान्ते सम्भवः। द्वादशराश्यन्तरं त्वेकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः। सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति।

**अधियज्ञः** पु० अधिकृतोयज्ञो यस्मात् प्रा०ब०। परमेश्वरे। "अधियज्ञः कथं? कोऽत्र" त्यर्जुन प्रश्ने। "अधियज्ञोऽहमेवात्र देहे देहभृतां वर!" इति भगवदुत्तरम् गीतायाम्। "अत्रास्मिन् देहेऽन्तर्यामित्वे न स्थितोऽहमधियज्ञः यज्ञादिकर्म्मप्रवर्त्तकस्तत्फलदाता चेति" श्रीधरः। यथा च तस्य सर्व्वान्तर्यामित्वं तथा अधिदेवताशब्देऽन्तर्यामिब्राह्मणे पुरस्ताद्दर्शितम्। यज्ञे विभ० अव्ययी०। यज्ञमधिकृत्येत्यर्थे अव्य०। अधियज्ञं ब्रह्म जपेदिति मनुः, यागे विभ०अव्ययी०। अधियागमप्युक्तार्थे अव्य०। अधिकः अधिकाङ्गयागः प्रा०स०। अधिकाङ्गे यागे पु०।

**अधियोग** पु० अधिकोयोगः प्रा०स०। ज्योतिषप्रसिद्धयात्रिकशुभयोगे। स च गमनसमयलग्ने—तस्माद्वा चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे, वा अन्यतमस्थाने बुधजीवभार्गवाणां मध्ये द्वयोः स्थितौ सत्यां भवति। "योगे क्षेममथाधियोगमने क्षेमं विपूर्णां बध इति" मुहू०।

**अधियोध** पु० आधिक्येन युध्यति अधि+युध—अच्। अतियोद्धरि। विभ०अव्ययी०। योधे इत्यर्थे अव्य०।

**अधिरथ** अध्यारूढः रथं रथिनम् अत्या०स०। अतिरथे। कर्णपितरि पु०। "विवेशाधिरथोरङ्गं यष्टिप्राणो ह्वयन्निवेति" भा० आदि०। तस्यापत्यम् इञ्। आधिरथिः कर्णे पु०। कर्णपर्व्वणि भूरिप्रयोगोऽस्य।

**अधिराज्** पु० अधिराजते अधि+राज—क्विप्। साम्राज्यवति, नृपे, सम्पन्नन्टपे च "प्रायोपविष्टो गङ्गायामनादृत्याधिराट् श्रियमिति" भाग०। अधिकशोभान्विते त्रि०।

**अधिराज** पु० अधिको राजा टच् समा०। अधीश्वरे साम्राज्यवति, नृपे च। "शैलाधिराजतनया न ययौ न तस्थाविति" "हिमालयोनाम नगाधिराज" इति च कुमा०।

**अधिराज्य** न० अधिकं राज्यं प्रा०स०। साम्राज्ये। "अत्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभागिति"।

**अधिराष्ट्र** न० अधिकृतं राष्ट्रमत्र प्रा०ब०। राज्ये। विभ० अव्ययी०। राष्ट्रमधिकृत्येत्यर्थे अव्य०।

**अधिरुक्म** त्रि० अधिगतं रुक्ममाभरणं येन प्रा०ब०। अधिगतसुवर्णाभरणे मानवे। अधिरुक्मा विनीयते" इति ऋ० ८,४६,३३, अधिरुक्मा अधिकरुक्माभरणेति" भाष्यम्।

**अधिरूढ** त्रि० अधि+रुह—कर्त्तरि—क्त। उपरिभागे आरोहणकर्त्तरि, अतिवृद्धिमति च। [शयेनारोपिते।

**अधिरोपित** त्रि० अधि+रुह—णिच्—पुक् कर्मणि क्त। अति-

**अधिरोहण** न० अधि+रुह भावे—ल्युट्। उपर्य्यारोहणे। घञ्। अधिरोहोऽप्यत्र पु०।

**अधिरोहणी** स्त्री अधिरुह्यतेऽनया अधि+रुह—करणे ल्युट्। (मइ) इति, (सिंड़ि) इति च प्रसिद्धे काष्ठवंशादिनिर्म्मिते उच्चस्थानारोहणसाधने सोपानवृन्दे। अधिरोहः साधनत्वेनास्त्यस्याः इनि। अधिरोहिणीत्यप्यत्र इति शब्दकल्पद्रुमः तन्मूलं मृग्यम्। रायमुकुटादिभिः ल्युटैव-तत्पदसाधनान्नास्य इन्यन्यता।

**अधिलोक** अव्य० लोके विभ० अव्ययी०। लोके इत्यर्थे।

**अधिवक्तृ** त्रि० अधि+वच—तृच्। पक्षपातेन वक्तरि। "विश्वाहेन्द्रो अधिवक्ता" इति ऋ० १,१००,१०, अधिवक्ता पक्षपातेन वचनयुक्त इति भा०। स्त्रियां ङीप्।

**अधिवचन** न० अधि+वच—ल्युट्। पक्षपातेन कथने। "अधिकवचनं पक्षपातेन वचन"मिति माधवाचार्य्यः।